[1]जवमानः, जावयमानः, जिजावयिषमाणः, — जोजूयमानः ;
जोष्यमाणः, जावयिष्यमाणः, जिजावयिषिष्यमाणः, —जोजूयिष्यमाणः ;
[2]जूः-जुवौ-जुवः ; — —
जुतम्-जुतः-जुतवान्, जावितः, जिजावयिषितः, जुजूषितः, जोजूयितः-तवान् ;
जवः, [3]जवनः,[A] [4]प्रजवी,[B] जावः, जिजावयिषुः, जुजूषुः, [5]जोजुवः ;
जोतव्यम्, जावयितव्यम्, जिजावयिषितव्यम्, जुजूषितव्यम्, जोजूयितव्यम् ;
जवनीयम्, जावनीयम्, जिजावयिषणीयम्, जुजूषणीयम्, जोजूयनीयम् ;
[6]जव्यम्-अवश्यजाव्यम्[7], जाव्यम्, जिजावयिष्यम्, जुजूष्यम्, जोजूय्यम् ;
ईषज्जवः-दुर्जवः-सुजवः ; — — —
[8]जूयमानः, जाव्यमानः, जिजावयिष्यमाणः, जुजूष्यमाणः, जोजूय्यमानः ;
[9]जवः, जावः, जिजावयिषः, जुजूषः, जोजूयः ;
जोतुम्, जावयितुम्, जिजावयिषितुम्, जुजूषितुम्, जोजूयितुम् ;
[10]जूतिः,[C] जावना, जिजावयिषा, जुजूषा, जोजूया ;

---

1. क्षीरस्वामिमते धातोरस्य ङित्वात् 'अनुदात्तङित आत्मनेपदम्' (1-3-12) इति शानच्।
2. 'भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्' (3-2-177) इति ताच्छीलिके क्विपि, 'वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' (वा. 3-2-178) इति वचनाद् दीर्घः। जूः=पिशाचः।
3. 'जुचङ्क्रम्यदन्द्रम्य—' (3-2-150) इति ताच्छीलिको युच्। अनादेशः।
4. 'प्रजोरिनिः' (3-2-156) इति तच्छीलादिषुकर्तृषु इनिप्रत्ययः।
5. यङन्तात् पचाद्यचि, यङो लुकि, 'न धातुलोप—' (1-1-4) इति गुणनिषेधे, 'अचि श्नुधातु—' (6-4-77) इत्युवङ्।
6. 'अचो यत्' (3-1-97) इति यति, गुणावादेशौ।
7. 'ओरावश्यके' (3-1-125) इति ण्यति, वृद्धिः आवादेशश्च।
8. 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
9. 'ऋदोरप्' (3-3-57) इति घञपवादः अप्प्रत्ययः।
10. 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (3-3-97) इति सूत्रेण क्तिनि दीर्घो निपातितः।

A. 'विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः॥' किरातार्जुनीये 5. 7.
B. 'जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया।' भ. का. 7.19.
C. 'जूतिमिच्छथ चेत् तूर्णं कीर्तिं वा पातुमात्मनः' भ. का. 7. 69.